# Shri Krishna Stuti

# શ્રીકૃષ્ણસ્તુતિઃ

## Document Information

Text title : Shri Krishna Stuti 05 14

File name : kRRiShNastutiH.itx

Category : vishhnu, krishna, stuti

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 05-14

Latest update : October 9, 2021

Send corrections to : Sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 9, 2021

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તુતિઃ

સૃજદ્રક્ષત્સંહરદ્યદ્વિશ્વમાત્મનિ માયયા ।
તદ્બ્રહ્મ દદ્યાદ્બ્રહ્માસ્મીત્યનુભૂતિમયીં ધિયમ્ ॥ ૧॥

શ્રીમત્યાં દ્વાર્વત્યામાસીનં કલ્પપાદપાધસ્તાત્ ।
મણિમણ્ડપાન્તરબ્જે વિદ્યાશ્રયમાશ્રયે પરં ધામ ॥ ૨॥

હ્રીમત્યા રતિમત્યા રુક્મિણ્યા સત્યભામયા ચાપિ ।
ઊરુસ્થિતયોપાસે શ્લિષ્ટમવિદ્યાશ્રયમહં ધામ ॥ ૩॥

ક્લીઙ્કારાત્મકમૂર્તિઃ સ્ફૂર્તિઃ સત્તા ચ સકલસ્ય ।
માયિમહોઽઞ્જનનીલં સચ્ચિત્સુખરૂપમનિશમાશાસે ॥ ૪॥

કૃતસક્તિભક્તિમતિ પ્રસૃમરમદને ચ ગોપયુવતિજને ।
મણિમકુટાઙ્ગદકટકપ્રભૃતિભિરિદ્ધો હરિર્મુદે નઃ સ્તાત્ ॥ ૫॥

ષ્ણાધાતુવાચ્યનિરતૈર્જપદ્ભિરનિશં સ્મરદ્ભિશ્ચ ।
મુનિભિરુપાસિતમીડે ગોપાલં નારદપ્રમુખૈઃ ॥ ૬॥

યમવરુણસોમશક્રપ્રભૃતિભિરમરૈરુપાસ્યમાનાય ।
કૃષ્ણાયાસ્તુ નમઃ સત્સુખમયપરમાર્થરૂપાય ॥ ૭॥

ગોપવધૂનાં નિકરૈઃ પ્રિયમુખપદ્મોત્કલોચનભ્રમરૈઃ ।
વિશ્લથનીવીકબરૈઃ પરિવૃતમીડે પરં મહસ્તદહમ્ ॥ ૮॥

વિન્યસ્ય વેણુમધરે નાદબ્રહ્મામૃતોદધૌ ભુવનમ્ ।
મગ્નં કુર્વાણા મેં નિર્વાણાયાસ્તુ ભાવના કાચિત્ ॥ ૯॥

દાનવરક્ષોયક્ષપ્રેતોરગસિધ્દકિન્નરપ્રમુખૈઃ ।
પરિવૃતમસ્તુ પરં તદ્વસ્તુ વિભૂત્યૈ યદોઃ કુલાભરણમ્ ॥ ૧૦॥

યમિનામન્તઃ સ્વાન્તં બધ્દસ્થિતયે નમોઽસ્તુ ચિદ્વપુષે ।
ગોવિન્દાયાસુસમાકટાક્ષવીક્ષાદ્વિરુક્તનીલિમ્ને ॥ ૧૧॥

ગોઘટયા પરિવીતે ગોપાલૈરપિ ચ ધામ્નિ નિર્વિકૃતૌ ।
વિહરતુ માનસમનિશં યન્તરિ કુન્તીસુતસ્ય મમ ॥ ૧૨॥

પીતામ્બરોજ્જ્વલશ્રીશ્રીવત્સોદ્ભાસિતોરસ્કા ।
કૌસ્તુભકૃતમણિભૂષા રક્ષતુ માં ભાગ્યપરિગતિર્મહતામ્ ॥ ૧૩॥

જલજારિયોગમુદ્રાવેણુગદાભાસુરાષ્ટભુજમ્ ।
પ્રણતિપરદુરિતનિકરપ્રમથનકૃતદીક્ષમચ્યુતં નૌમિ ॥ ૧૪॥

નરસુરવારકતનુભૃદ્ધૃદયગુહાગૂઢનિજમહિમા ।
વનમાલયા નિવીતઃ પરમાત્મા સ્ફુરતુ મમ હૃદયે ॥ ૧૫॥

વલ્લવસુચરિતમવ્યાત્ સવ્યાગ્રાશ્લિષ્ટજાનુદક્ષપદમ્ ।
ક્ષ્માદનારતવિગલદ્રત્નઘટન્યસ્તપાદુકમસ્માન્ ॥ ૧૬॥

લક્ષ્મીવક્ષોજમિલદ્ઘુસૃણારુણવર્ણવક્ષસં વન્દે ।
અઙ્કસ્થિતદયિતાભ્યામભિષિક્તં રત્નધારયા શૌરિમ્ ॥ ૧૭॥

ભાસુરભૂસુરનિકરૈર્વિચીયમાનોઽચ્યુતસ્ત્રયીશિરસિ ।
મમ સુરતરુમઞ્જર્યા દિશતુ મુદં મણિભિરભિષિક્તઃ ॥ ૧૮॥

યશ્ચ પ્રકુતેસ્તસ્યાઃ કાર્યાણાં પ્રેરકોઽહિરાજેન ।
સિક્તાય નમો રત્નૈર્ગોપીજનવલ્લભાયાસ્મૈ ॥ ૧૯॥

સ્વાશ્રયમેતદ્વિશ્વં સ્વમપિ ચ વિશ્વાશ્રયં વિદુર્હિ બુધાઃ ।
યન્નમનાત્ સકલૈરપ્યભિષિક્તો મણિભિરવતુ માં સ હરિઃ ॥ ૨૦॥

હારં યદ્ધામ બુધાઃ સ્વાત્મનિ પશ્યન્તિ સોઽહમિતિ ।
તદતિપ્રસન્નવદનં સ્વાહાજાનિર્મમાસ્ત્વવિદ્યાયાઃ ॥ ૨૧॥

મન્ત્રાક્ષરારબ્ધમુખાર્ણપદ્યાં-
 તદ્ધ્યાનવાચ્યપ્રકટોક્તિહૃદ્યામ્ ।
મન્ત્રાર્ણમાલાં દધતોઽનવદ્યાં
 યતો લભેરન્ પરમાત્મવિદ્યામ્ ॥ ૨૨॥

વ્રજરમણીરમણીયકટાક્ષ-
 ભ્રમરઘટારભટીપરિશોભિ ।
કપટશિશોરશિવપ્રતિઘાતં
 મુખનવતામરસં મમ કુર્યાત્ ॥ ૨૩॥

ઇતિ શ્રી કૃષ્ણસ્તુતિઃ સમાપ્તા ।

Proofread by Rajesh Thyagarajan

*Shri Krishna Stuti*

pdf was typeset on October 9, 2021

Please send corrections to *sanskrit@cheerful.com*